# || अर्धनारीश्वराष्टोत्तरशतनाम स्तोत्रं ||

चामुण्डिकाम्बा श्रीकन्ठः पार्वती परमेश्वरः ।
महाराज्ञीमहादेवस्सदाराध्या सदाशिवः ॥ १ ॥

शिवार्धाङ्गी शिवार्धाङ्गो भैरवी कालभैरवः ।
शक्ति त्रितय रूपाढ्या मूर्तित्रितय रूपवान् ॥ २ ॥

कामकोटिसुपीठस्था काशी क्षेत्र समाश्रयः ।
दाक्षायनी दक्षवैरी शूलिनि शूलधारकः ॥ ३ ॥

ह्रींकार पञ्जर शुकी हरिशंकर रूपवान् ।
श्रीमद्गनेशजननी षडानन सुजन्मभूः ॥ ४ ॥

पञ्चप्रेतासनारूढा पञ्चब्रह्मस्वरूपभृत् ।
चन्डमुन्डशिरश्छेत्री जलन्धर शिरोहरः ॥ ५ ॥

सिंहवाहो वृषारूढ श्यामाभा स्फटिकप्रभः ।
महिषासुर संहर्त्री गजासुरविमर्धनः ॥ ६ ॥

महाबला चलावासा महाकैलासवासभूः ।
भद्रकाली वीरभद्रो मीनाक्षी सुन्दरेश्वरः ॥ ७ ॥

भण्डासुरादि संहर्त्री दुष्टान्धक विमर्धनः ।
मधुकैटभ संहर्त्री मधुरापुरनायकः ॥ ८ ॥

कालत्रय स्वरूपाढ्या कार्यत्रयविधायकः ।
गिरिजाता गिरीशश्च वैष्णवी विष्णुवल्लभः ॥ ९ ॥

विशालाक्षी विश्वनाथः पुष्पास्त्रा विष्णुमार्गणः ।
कौसुम्भवसनोपेता व्याघ्रचर्मांबरावृतः ॥ १० ॥

मूलप्रकृतिरूपाढ्या परब्रह्मस्वरूपवान् ।
रुण्डमाला विभूषाढ्या लसद्रुद्राक्षमालिकः ॥ ११ ॥

मनोरूपेक्षु कोदण्डा महामेरु दनुर्धरः ।
चंद्रचूडा चंद्रमौलिः महामाया महेश्वरः ॥ १२ ॥

महाकाली महाकालो दिव्यरूपा दिगम्बरः ।
बिन्दुपीठ सुखासीना श्रीमदोंकारपीठगः ॥ १३ ॥

हरिद्रा कुंकुमालिप्ता भस्मोद्धूलितविग्रहः ।
महापद्माटवीलोला महाबिल्वाटवीप्रियः ॥ १४ ॥

सुधामयी विषधरो मातङ्गी मकुटेश्वरः ।
वेदवेद्या वेदवाजी चक्रेशी विष्णुचक्रदः ॥ १५ ॥

जगन्मयी जगद्रूपो मृडाणी मृत्युनाशनः ।
रामार्चितपदाम्भोजा कृष्णपुत्रवरप्रदः ॥ १६ ॥

रमावाणीसुसंसेव्या विष्णुब्रह्मसुसेवितः ।
सूर्यचन्द्राग्निनयना तेजस्त्रयविलोचनः ॥ १७ ॥

चिदग्निकुण्डसम्भूता महालिङ्ग समुद्भवः ।
कंबुकण्ठी कालकण्ठो वज्रेशी वज्रपूजितः ॥ १८ ॥

त्रिकन्टकी त्रिभन्गीसः भस्मरक्षा स्मरान्तकः ।
हयग्रीववरोद्धात्री मार्कन्डेयवरप्रदः ॥ १९ ॥

चिन्तामणि गृहावासा मन्दराचलमन्दिरः ।
विन्ध्याचल कृतावासा विन्ध्यशैलार्य पूजितः ॥ २० ॥

मनोन्मनी लिङ्गरूपो जगदम्बा जगत्पिता ।
योगनिद्रा योगगम्यो भवानी भवमूर्तिमान् ॥ २१ ॥

श्रीचक्रात्मरथारूढा धरणीधरसम्स्थितः
श्रीविद्यावेद्य महिमा निगमागम सम्श्रयः ॥ २२ ॥

दशशीर्ष समायुक्ता पञ्चविंसति शीर्षवान ।
अष्टादश भुजायुक्ता पञ्चासत्करमन्दितः ॥ २३ ॥

ब्राह्म्यादि मातृकारूपा शताष्टेकादशात्मवान ।
स्थिरा स्थानु स्तथाबाला सद्योजात उमा मृडः ॥ २४ ॥

शिवाशिवश्च रुद्राणी रुद्रश्चैवेश्वरीश्वरः ।
कदम्बकाननावासा दारुकारण्यलोलुपः ॥ २५ ॥

नवाक्षरी मनुस्तुत्या पञ्चाक्षर मनुप्रियः ।
नवावरण सम्पूज्या पञ्चायतनपूजितः ॥ २६ ॥

देहस्थषट्चक्रदेवी दहराकाशमध्यगः ।
योगिनीगनसंसेव्या भृग्वादि प्रमथावृतः ॥ २७ ॥

उग्रतारा घोररूपः शर्वाणी शर्वमूर्तिमान् ।
नागवेणी नागभूषो मन्त्रिणी मन्त्रदैवतः ॥ २८ ॥

ज्वालज्जिह्वा ज्वालन्नेत्रो दन्डनाथा दृगायुधः ।
पार्थान्जनास्त्र संदात्री पार्थपाशुपतास्त्रदः ॥ २९ ॥

व्यालकङ्चुक सम्वीता व्यालयज्ञोपवीतवान ।
नवलावण्यरूपाढ्या नवयौवन विग्रहः ॥ ३१ ॥

नाट्य प्रिया नाट्य मूर्तिः त्रिसन्ध्या त्रिपुरान्तकः ।
तन्त्रोपचार सुप्रीता तन्त्रादिम विधायकः ॥ ३२ ॥

नववल्लीष्ट वरदा नववीर सुजन्मभूः ।
भ्रमरज्या वासुकिज्यो भेरुण्डा भीमपूजितः ॥ ३३ ॥

निशुंबशुंब दमनी नीचापस्मारमर्दनः ।
सहस्राम्भुजरूढा सहस्रकमलार्चितः ॥ ३४ ॥

गङ्गासहोदरी गङ्गाधरो गौरी त्र्यंबकः ।
श्रीशैल भ्रमरांबाख्या मल्लिकार्जुनपूजितः ॥ ३५ ॥

भवतापप्रशमनी भवरोगनिवारकः
चन्द्रमंडलमध्यास्था मुनिमानसहंसकः ॥ ३६ ॥

प्रत्यङ्गिरा प्रसन्नत्माकामेशी कामरूपवान् ।
स्वयंप्रभा स्वप्रकाशः कालरात्री कृतान्तहृत् ॥ ३

सदान्नपूर्णा भिक्षाटो वनदुर्गा वसुप्रदः ।
सर्वचैतन्य रूपाढ्या सच्चिदानन्द विग्रहः ॥ ३८ ॥

सर्वमङ्गल रूपाढ्या सर्वकल्याणदायकः ।
राजेराजेश्वरी श्रीमद्राजराज प्रियंकरः ॥ ३९ ॥

अर्धनारीश्वरस्येदं नाम्नामष्टोत्तरं शतम् ।
पठन्नर्चन्सदा भक्त्या सर्व साम्राज्य माप्नुयात् ॥ ४० ॥

इति स्कान्दमहापुराणे अर्धनीरेएश्वर अष्टोत्तरं संपूर्णम् ॥

# Raw ITRANS Text

|| ardhanaariishvaraaShTottara shatanaama stotraM ||

caamuNDikaambaa shriikanThaH paarvatii parameshvaraH .
mahaaraaGYiimahaadevassadaaraadhyaa sadaashivaH .. 1 ..

shivaardhaaN^gii shivaardhaaN^go bhairavii kaalabhairavaH .
shakti tritaya ruupaaDhyaa muurtitritaya ruupavaan.h .. 2 ..

kaamakoTisupiiThasthaa kaashii kShetra samaashrayaH .
daakShaayanii dakShavairii shuulini shuuladhaarakaH .. 3 ..

hriiMkaara paJNjara shukii harishaMkara ruupavaan.h .
shriimadganeshajananii ShaDaanana sujanmabhuuH .. 4 ..

paJNchapretaasanaaruuDhaa paJNchabrahmasvaruupabhR^it.h .
canDamunDashirashChetrii jalandhara shiroharaH .. 5 ..

siMhavaaho vR^iShaaruuDha shyaamaabhaa sphaTikaprabhaH .
mahiShaasura saMhartrii gajaasuravimardhanaH .. 6 ..

mahaabalaa calaavaasaa mahaakailaasavaasabhuuH .
bhadrakaalii viirabhadro miinaakShii sundareshvaraH .. 7 ..

bhaNDaasuraadi saMhartrii duShTaandhaka vimardhanaH .
madhukaiTabha saMhartrii madhuraapuranaayakaH .. 8 ..

kaalatraya svaruupaaDhyaa kaaryatrayavidhaayakaH .
girijaataa giriishashca vaiShNavii viShNuvallabhaH .. 9 ..

vishaalaakShii vishvanaathaH puShpaastraa viShNumaargaNaH .
kausumbhavasanopetaa vyaaghracarmaaMbaraavR^itaH .. 10 ..

muulaprakR^itiruupaaDhyaa parabrahmasvaruupavaan.h .
ruNDamaalaa vibhuuShaaDhyaa lasadrudraakShamaalikaH .. 11 ..

manoruupekShu kodaNDaa mahaameru danurdharaH .
caMdracuuDaa caMdramauliH mahaamaayaa maheshvaraH .. 12 ..

mahaakaalii mahaakaalo divyaruupaa digambaraH .
bindupiiTha sukhaasiinaa shriimadoMkaarapiiThagaH .. 13 ..

haridraa kuMkumaaliptaa bhasmoddhuulitavigrahaH .
mahaapadmaaTaviilolaa mahaabilvaaTaviipriyaH .. 14 ..

sudhaamayii viShadharo maataN^gii makuTeshvaraH .
vedavedyaa vedavaajii cakreshii viShNucakradaH .. 15 ..

jaganmayii jagadruupo mR^iDaaNii mR^ityunaashanaH .
raamaarcitapadaambhojaa kR^iShNaputravarapradaH .. 16 ..

ramaavaaNiisusaMsevyaa viShNubrahmasusevitaH .
suuryacandraagninayanaa tejastrayavilocanaH .. 17 ..

cidagnikuNDasambhuutaa mahaaliN^ga samudbhavaH .
kaMbukaNThii kaalakaNTho vajreshii vajrapuujitaH .. 18 ..

trikanTakii tribhangiisaH bhasmarakShaa smaraantakaH .
hayagriivavaroddhaatrii maarkanDeyavarapradaH .. 19 ..

cintaamaNi gR^ihaavaasaa mandaraacalamandiraH .
vindhyaacala kR^itaavaasaa vindhyashailaarya puujitaH .. 20 ..

manonmanii liN^garuupo jagadambaa jagatpitaa .
yoganidraa yogagamyo bhavaanii bhavamuurtimaan.h .. 21 ..

shriicakraatmarathaaruuDhaa dharaNiidharasamsthitaH
shriividyaavedya mahimaa nigamaagama samshrayaH .. 22 ..

dashashiirSha samaayuktaa paJNcaviMsati shiirShavaan .
aShTaadasha bhujaayuktaa paJNcaasatkaramanditaH .. 23 ..

braahmyaadi maatR^ikaaruupaa shataaShTekaadashaatmavaan .
sthiraa sthaanu stathaabaalaa sadyojaata umaa mR^iDaH .. 24 ..

shivaashivashca rudraaNii rudrashcaiveshvariishvaraH .
kadambakaanaanaavaasaa daarukaaraNyalolupaH .. 25 ..

navaakSharii manustutyaa paJNcaakshara manupriyaH .
navaavaraNa sampuujyaa paJNcaayatanapuujitaH .. 26 ..

dehasthaShaTcakradevii daharaakaashamadhyagaH .
yoginiiganasaMsevyaa bhR^igvaadi pramathaavR^itaH .. 27 ..

ugrataaraa ghoraruupaH sharvaaNii sharvamuurtimaan.h .
naagaveNii naagabhuuSho mantriNii mantradaivataH .. 28 ..

jvaalajjihvaa jvaalannetro danDanaathaa dR^igaayudhaH .
paarthaanjanaastra saMdaatrii paarthapaashupataastradaH .. 29 ..

puShpavaccakra taaTaN^kaa phaniraajasukuNDalaH .
baaNaputrii varoddhaatrii baaNaasuravarapradaH .. 30 ..

vyaalakaN^chuka samviitaa vyaalayaGYopaviitavaan .
navalaavaNyaruupaaDhyaa navayauvana vigrahaH .. 31 ..

naaTya priyaa naaTya muurtiH trisandhyaa tripuraantakaH .
tantropacaara supriitaa tantraadima vidhaayakaH .. 32 ..

navavalliiShTa varadaa navaviira sujanmabhuuH .
bhramarajyaa vaasukijyo bheruNDaa bhiimapuujitaH .. 33 ..

nishuMbashuMba damanii niicaapasmaaramardanaH .
sahasraambhujaruuDhaa sahasrakamalaarcitaH .. 34 ..

ga~Ngaasahodarii ga~Ngaadharo gaurii tryaMbakaH .

shriishaila bhramaraaMbaakhyaa mallikaarjunapuujitaH .. 35 ..

bhavataapaprashamanii bhavaroganivaarakaH
candramaMDalamadhyaasthaa munimaanasahaMsakaH .. 36 ..

pratya~Ngiraa prasannatmaakaameshii kaamaruupavaan.h .
svayaMprabhaa svaprakaashaH kaalaraatrii kR^itaantahR^it.h .. 37 ..

sadaannapuurNaa bhikShaaTo vanadurgaa vasupradaH .
sarvacaitanya ruupaaDhyaa saccidaananda vigrahaH .. 38 ..

sarvamaN^gala ruupaaDhyaa sarvakalyaaNadaayakaH .
raajeraajeshvarii shriimadraajaraaja priyaMkaraH .. 39 ..

ardhanaariishvarasyedaM naamnaamaShTottaraM shatam.h .
paThannarcansadaa bhaktyaa sarva saamraajya maapnuyaat.h .. 40 ..

iti skaandamahaapuraaNe ardhaniireeshvara aShTottaraM saMpuurNam.h ..